 नीतिः नीतिः

एतदष्टासु वर्गेषु चारान् सम्यक् प्रयोजयेत् ॥
कार्य्याकार्य्यविभागाय चाष्टवर्गाधिकारिणाम् ।
अष्टौ चारान्नियुञ्जीयादष्टवर्गेषु पार्थिवः ॥
दशस्वन्येषु युञ्जीत क्रमतः शृणु तानि मे ।
स्वाम्यमात्यराष्ट्राणि मित्रं कोषो बलन्तथा ॥
दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम् ।
दुर्गयुक्ताष्टवर्गे चारं नात्मनि योजयेत् ॥
तस्मादिमानि शेषाणि पञ्च चारपदानि तु ।
शुद्धान्तेष्वेव पुत्रेषु सूपकारादौ महानसे ॥
प्रभुदासीनयोश्चैव बलाबलविनिश्चये ।
चादौ दशसु चैतेषु चारानाज्ञा प्रयोजयेत् ॥
न यत् प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत् ।
निरूप्य तत्प्रतीकारमवश्यं छिद्रतश्चरेत् ॥
यथा नियोगस्तेषां यो यो यत्रान्यथाचरेत् ।
ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा नियोजयेत् ॥
चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः ।
प्रदोषसमये पृच्छेत्तदानीमेव साधयेत् ॥
स्वपुत्रे चाथ शुद्धान्ते ये तु चारा महानसे ।
नियुक्तास्तान् मध्यरात्रौ पृच्छेद्यच्चापि मन्त्रिणि ॥
एतान् चारान् स्वयं पश्येन्नृपतिर्मन्त्रिणा विना ।
अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम् ॥
नैकवेशधरश्चारो नैको गीतुवाद्यवर्ज्जितः ।
संस्तुतो नहि सर्व्वत्र नातिदीर्घो न वामनः ॥
सततं न दिवाचारी न रोगी नाप्यबुद्धिमान् ।
न वित्तविभवैर्हीनो न भार्य्यापुत्रवर्ज्जितः ॥
कार्य्यचारी नृपतिना गुह्यतत्त्वविनिर्णये ।
अनेकवेशग्रहणक्षमं भार्य्यासुतैर्युतम् ॥
बहुदेशवचोऽभिज्ञं पराभिप्रायवेदकम् ।
दृढभक्तं प्रकुर्व्वीत चारं शक्तमचाञ्चलम् ॥
अधितिष्ठेत् स्वयं राजा कृषिमात्मसमैस्तथा ।
वणिक्पथे च दुर्गादौ तेषु भक्तान्नियोजयेत् ॥
अन्तःपुरे पितुस्तुल्यान् प्राज्ञान् वृद्धान्नियोजयेत् ।
महान् पञ्चाशतो वृद्धान् स्त्रियो या वृद्धतत्-
परा: ॥ * ॥
शुद्धान्तद्वारि युञ्जीयात् स्त्रियो वृद्धा मनीषिणीः ।
नैकः स्वपेत् कदाचित्तु नैको भुञ्जीत पार्थिवः ॥
नैकाकिनीषु भार्य्यासु गच्छेन्नैवाथ नैककः ।
अमात्यानुपधाशुद्धान् भार्य्याः पुत्रांस्तथैव च ॥
प्रकुर्य्यात् सततं भूपः स्वप्रसादं समाचरन् ।
धर्म्मार्थकाममोक्षैश्च प्रत्येकपरिशोधनैः ॥
उपेत्य क्षीयते तस्मादुपधा परिकीर्त्तिता ।
अथ कामोपधाभ्यान्तु भार्य्याः पुत्रांस्तु शोधयेत् ॥
धर्म्मार्थाभिरमात्यांस्तु सर्व्वाभिः सचिवान् पुनः ।
एभिर्यत्नैस्तथा दारैरिहैव नृपता भवेत् ॥ * ॥
तस्मात्त्वमस्तु राज्यार्थी धर्म्ममेवं समाचरेत् ।
अनेनैवाभिचारेण यतेर्वा पार्थिवो स्वयम् ।
प्राणांस्त्यक्ष्यति राजा त्वं भविष्यसि न संशयः ॥
इति धर्म्मो नृपस्यैव अश्वमेधादिकश्च यत् ।
स्वर्गं न कुरुते भूपस्तस्मात्त्वं कुरु सत्तम ! ॥
एवं मन्त्रैरमात्यैश्च नृपः कार्त्तान्तिकान् द्विजान् ।
तैरज्ञातान् स्वयं ज्ञात्वा शङ्कीयात्तस्य तेऽन्यतः ॥
यदि राज्याभिलाषेण सचिवो धर्म्ममाचरेत् ।

नृपतौ वाधिकं कुर्य्याद्धर्म्मं तं हीनतां नयेत् ॥
आभिचारिकमत्यर्थं कुर्व्वाणन्तु विघातयेत् ।
प्रवासयेद्ब्राह्मणन्तु पार्थिवो ह्याभिचारिकम् ॥
एषां धर्म्मोपधा ज्ञेया तैरमात्यान् सदा चरेत् ।
एतादृशीं तथैवान्यामुपधां धर्म्मतश्चरेत् ॥ * ॥
कोषाध्यक्षान् समामन्त्र्य राजामात्यान् प्रती-
रयेत् ।
पुत्रानन्यान् प्रति तथामन्त्र्य संवरणक्षमान् ॥
अयं हि प्रचुरः कोषो सदायत्तो नरोत्तम ।
आनये तव सम्मत्या तद्यदि त्वं प्रतीच्छसि ॥
तत्रान्नलब्धादस्माकं जीवनञ्च भविष्यति ।
त्वचापि प्रचुरैः कोषैः किं किं नो वा करिष्यसि ॥
एवमन्यैः कोषगतैरुपायैर्नृपसत्तम ।
पुत्रामात्यादिकान् सर्व्वान् सततं परिशोधयेत् ॥
कोषदोषकरान् सम्यग्हर्त्तुमिच्छून्निवारयेत् ।
दैवचिन्तान् विमन्त्र्येत कुर्य्याद्वै कोषरक्षणम् ॥ * ॥
दासीश्च शिल्पिनीर्वृद्धा मेधाधृतिमतीः स्त्रियः ॥
अन्तर्म्महिषि या यान्ति विदिता सचिवादिभिः ।
ता राजा रहसि स्थित्वा भार्य्यादिभिरलक्षितः ॥
अभिमन्त्राथ संमन्त्र्य प्रेरयेत् सचिवान् प्रति ।
ता गत्वा हृदयं बुद्धा स्त्रियो वै ज्ञानतत्पराः ॥
महिषीप्रमुखा राजस्त्री वै कामयते शुभाः ।
तत्राहं योजयिष्यामि यदि ते वर्त्तते स्पृहा ॥
सचिवस्त्री कामयते त्वद्योग्यो वरवर्णिनि ! ।
तं सङ्गमयितुं शक्ता यदि श्रद्धा तवास्त्यहम् ॥
इत्यनेन प्रकारेण नानोपायैस्तथेतरैः ।
भार्य्याः पुत्रीर्दुहितृश्च स्नुषाश्च प्रसूषास्तथा ॥
शोधयेत् सचिवान् पुत्रान् पौत्रादीन् सेवकां-
स्तथा ।
कामोपधाविशुद्धांस्तु घातयेदविचारयन् ॥
स्त्रियश्च दण्ड्या योग्येन ब्राह्मणांस्तु प्रवासयेत् ।
मोक्षमार्गावसक्तन्तु हिंसापैशुन्यवर्ज्जितम् ।
चर्मैकसारं नृपतिः सचिवं परिवर्ज्जयेत् ॥
मोक्षमार्गावसक्तांस्तु दण्ड्यानपि न दण्डयेत् ।
दशबुद्धिस्तु सर्व्वत्र तस्मात्तं परिवर्ज्जयेत् ॥ * ॥
इति कृत्वं चोपधानामुपधा बहुधा पुनः ।
विवेचिता चोपशस्ता तच्छास्त्रे तत्र चोधयेत् ॥
विग्रहं सततं राजा परैर्न सम्यगाचरेत् ।
भूवित्तमित्रलाभेषु निश्चितेष्वेव विग्रहः ॥
समाङ्गेष्वप्रमादश्च सदा कार्य्यो नृपोत्तमैः ।
कोषस्य सर्व्वथा रक्षां सततं सम्यगाचरेत् ॥ * ॥
मन्त्रिणस्तु नृपः कुर्य्याद्विप्रान् विद्याविशारदान् ।
विनयज्ञान् कुलीनांश्च धर्म्मार्थकुशलानृजून् ॥
मन्त्रयेत्तैः समं काले नात्यर्थं बहुभिश्चरेत् ।
एकैकेनैव कर्म्मैवं मन्त्रस्य तु विनिश्चयम् ॥
व्यस्तेष्वेव समस्तेषु धाम्यस्य व्यपदेशतः ।
सुसंवृतं मन्त्रगृहं स्थलमारुह्य मन्त्रयेत् ॥
अरण्ये निःशलाके वा न यामिन्यां कदाचन ।
शिशून् शाखामृगान् षण्ढान् शुकान् वै सारि-
कास्तथा ॥
मर्म्मवेधमनीषेषु मनुष्यानुद्धतांस्तथा ।
दूष्यं मन्त्रभेदेषु दृष्टयो यत्र जायते ॥

न तच्छक्यं समाधातुं दैवैर्नृपशतैरपि ।
दण्ड्यांस्तु दण्डयेद्दण्डैरदण्ड्यान् दण्डयेन्नहि ॥
अदण्डयन्नृपो दण्ड्यानदण्ड्यांश्चापि दण्डयन् ।
नृपतिर्वाच्यतां प्राप्य घोरकिल्बिषमाप्नुयात् ॥ * ॥
दुर्गन्तु सततं कुर्य्यात् प्राकाराट्टालतोरणैः ।
दूषितान्नगराद्राजा दूरे दुर्गाश्रयं चरेत् ॥
दुर्गं बलं नृपाणान्तु नित्यं दुर्गं प्रशस्यते ।
शतमेको योधयति दुर्गस्थो यो धनुर्धरः ॥
शतं दशसहस्राणि तस्माद्दुर्गं प्रशस्यते ॥
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च ।
अरण्यवनदुर्गञ्च शैलजं परिखोद्भवम् ।
दुर्गं कार्य्यं नृपतिना यथायोग्यं स्वदेशतः ॥
दुर्गं कुर्व्वन् पुरं कुर्य्यात् त्रिकोणं धनुराकृति ।
वर्त्तुलं वा चतुष्कोणं नान्यथा नगरञ्चरेत् ॥
चन्द्राकृतिदुर्गञ्च सततं कुलनाशनम् ।
यथा राक्षसराजस्य लङ्का दुर्गा स्थिता पुरा ॥
बलेः पुरं शोणिताख्यं तेषां दुर्गे प्रतिष्ठितम् ।
यतस्तद्राजनाकारमतो भ्रष्टः श्रिया बलिः ॥
सौभाख्यं शाल्वराजस्य नगरं पञ्चकोणकम् ।
दिवि यद्वर्त्तते राजंस्तच्च भग्नं भविष्यति ॥
तथायोध्याह्वयं भूप ! पुरमिक्ष्वाकुभूभुजाम् ।
धनुराकृति तथापि ततो भूरिजयप्रदम् ॥
दुर्गभूमौ यजेद्दुर्गां दिक्पालांश्चैव द्वारतः ।
पूजयित्वा विधानेन जयं भूपः समाप्नुयात् ।
ततो दुर्गं नृपः कुर्य्यात् सततं जयवृद्धये ॥ * ॥
न ब्राह्मणान् सदा राजा कदाचिदवमन्यते ।
अवमत्य नृपो विप्रान् प्रेत्येह दुःखभाग्भवेत् ॥
न विरोधस्तु तैः कार्य्यः स्वानि तेषां न चाददेत् ।
कृत्यकालेषु सततं तानेव परिपूजयेत् ॥
तेषां निन्दां प्रकुर्व्वीत नाभ्यसूयां तथाचरेत् ।
एवं नृपो महाबुद्धिस्तत्कृतमङ्गलसंयतः ।
अप्रमादी चारचक्षुर्गुणवान् सुप्रियंवदः ॥
प्रेत्येह महतीं सिद्धिं प्राप्नोति सुखभोगवान् ।
यैर्गुणैर्योजितश्चात्मा तैः पुत्रानपि योजयेत् ॥
नृपस्य च स्वतन्त्रत्वं सततं स्वं विनाशयेत् ।
स्वतन्त्रो भूपतनयो विकारं याति निश्चयम् ॥
निर्व्विकाराय सततं तद्गुणैः परिपूजयेत् ।
भोजने शयने पाने पुत्रचारांश्च योजयेत् ॥
नियोजयेत् सदाचारान् भूपः कामविचेष्टने ।
अस्वतन्त्राः स्त्रियो नित्यं हानये संभवन्ति हि ॥
तस्मात् कुमारं महिषीसुपथाभिर्मनोहरैः ।
शोधयित्वा नियुञ्जीत यौवराज्यावरोधयोः ।
अन्तःपुरप्रवेशे तु स्वतन्त्रत्वं निषेधयेत् ॥
भूपपुत्रस्य भार्य्याया बहिःसारे तथैव च ।
अयं विशेषः संक्षेपान्नृपधर्म्मो मयोदितः ॥
पुत्राणां गुणविन्यासो भार्य्याणामपि भूपते ।
उशना राजनीतीनां तन्त्राणि च बृहस्पतिः ॥
चकाराज्यान् विशेषांस्तु तयोस्तन्त्रेषु शोधयेत् ।
एवं राजा महाभागो राजनीतौ विशेषताम् ।
कुर्व्वन्न सीदति सदा भूयसीं श्रियमश्नुते ॥”
इति कालिकापुराणे राजनीतिविधिर्नाम ८५
अध्यायः ॥ * ॥